International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 310-312
© 2022 IJSR
www.anantaajournal.com
Received: 05-10-2021
Accepted: 08-11-2021

**डॉ. सीमा जैन**
असि. प्रोफेसर, सामान्य संस्कृत, राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

Corresponding Author:
**डॉ. सीमा जैन**
असि. प्रोफेसर, सामान्य संस्कृत, राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

# शिशुपालवधमहाकाव्ये युद्धवर्णनम्

## डॉ. सीमा जैन

**प्रस्तावना**

महाकविमाघेन शिशुपालवधमहाकाव्ये युद्धस्य विस्तृतं चित्रणं कृतम्। युद्धवर्णनप्रसङ्गे कविना स्वकीयशैलीगताः समस्ता विशेषताः प्रकटिताः। तुमुलयुद्धाय सेनयोः सङ्गमस्य चित्रणन्तु चमत्कारजनकम्-

सञ्जग्माते तावपायानपेक्षौ सेनाम्भोधी धीरनादौ रयेण।
पक्षच्छेदात्पूर्वमेकत्र देशे वाञ्छन्तौ वा विन्ध्यसह्यौ निलेतुम्।। [1]

**तत्सङ्गतिप्रकारो यथा –**

पत्तिः पत्तिं वाहमेयाय वाजो नागं नागः स्यन्दनस्थो रथस्थम्।
इत्थं सेना वल्लभस्येव रागादङ्गेनाङ्गं प्रत्यनीकस्य भेजे।। [2]

**युद्धे हस्तिनामश्वानाञ्च वर्णनमस्ति –**

वर्ध्राबद्धा धौरितेन प्रयातामश्वीयानामुच्चकैरुच्चलन्तः।
रौक्मा रेजुः स्थासका मूर्तिभाजो दर्पस्येव व्याप्तदेहस्य शेषाः।। [3]
सान्द्रत्वक्कास्तल्पलाश्लिष्टकक्षा आङ्गीं शोभामाप्नुवन्तश्चतुर्थीम्।
कल्पस्यान्ते मारुतेनोपनुन्नाश्चेलुश्चण्डं गण्डशैला इवेभाः।। [4]

एकतो युद्धनिरता धन्विनः कार्मुकाणि आस्फालयन्ति, अपरतश्च गजारोहाः कुञ्जराणां शिरांसि आस्फालयन्ति। केचिद्योद्धारः रोषावेशात्शस्त्राणि त्यक्त्वा बाहुभ्यामेव युद्धं प्रारभन्ते। युद्धभूमौ पर्यस्तानि आतपत्राणि अन्तकस्य भोजनाय स्थापितानि रजतपात्राणि इव भान्ति स्म। अस्मिन् युद्धे रक्तस्य नद्य इव प्रावहन्। यथा -

रामेण त्रिःसप्तकृत्वो ह्रदानां चित्रं चक्रे पञ्चकं क्षत्रियास्त्रैः।
रक्ताम्भोभिस्तत्क्षणादेव तस्मिन्संख्येऽसंख्याः प्रावहन्द्वीपवत्यः।। [5]

रामेण भार्गवेण सामर्थ्यात्त्रीन्वारान् त्रिः। त्रिरावृत्ताः सप्त त्रिःसप्तकृत्वः। एकविंशतिवारानित्यर्थः। क्षत्रियास्त्रै राजन्यरक्तैः चित्रमद्भुतं ह्रदानां पञ्चपरिमाणस्य पञ्चकं चक्रे कृतम्। तस्मिन्संख्ये क्षणादेव रक्तैरेवाम्भोभिः असंख्या द्वीपवत्यो नद्यः प्रावहन्प्रासरन्। रामेण बहुकालेन च स्यमन्तपञ्चकाख्यं ह्रदपञ्चकमेव कथञ्चित्कृतम्। अत्र तु क्षणमात्रेणासंख्या नद्यः प्रवृत्ताः।

**श्रीकृष्णशिशुपालयोर्युद्धस्य दृश्यं यथा –**

तडिदुज्ज्वलजातरूपपुङ्खैः खमयः श्याममुखैर-मिध्वनद्भिः।
जलदैरिव रंहसा पतद्भिः पिदधे संहतिशालिभिः शरोघैः।। [6]

तडिद्वदुज्ज्वला दीप्ता जातरूपस्य हेम्नः पुङ्खाः कर्तर्यो येषां तैः। अयोवत् श्याममुखैः श्यामाग्रैरभिध्वनद्भिर्ध्वनिभिः स्वनत्पक्षैर्गर्जद्भिश्च रंहसा वेगेन पतद्भिर्धावद्भिः संहतिशालिभिः सङ्घवाहिभिः शरोघैर्जलदैरिव खमाकाशं पिदधे पिहितम्।

**युद्धवर्णनप्रसङ्गे विविधबन्धानां स्मरणं करोति कविः**

चलितोर्ध्वकबन्धसम्पदो मकरव्यूहनिरुद्धवर्त्मनः।
अतरत् स्वभुजौजसा मुहुर्महतः सङ्गरसागरानसौ।। [7]

असौ चैद्यश्चलिताः प्रवृत्ता ऊर्ध्वा उत्थिताः कबन्धसम्पदा शिरोहीनकलेवरसम्पद एवं कबन्धसम्पद उदकसमृद्धयो येषु तान्। मकरव्यूहा मकराकार-सैन्यविन्यासाः त एव मकरव्यूहा मकरादयः समूहा इति। तैर्निरुद्धवर्त्मनो निरुद्धप्रवेशमार्गान्। अत एव दुस्तरान्सङ्गरसागरान्समरसमुद्रान्स्वभुजौजसा निजभुजबलेनैव मुहुरसकृदतरत्। एवमेव-

विषमं सर्वतोभद्रचक्रगोमूत्रिकादिभिः।
श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद्बलम्।। [8]

**आयुधस्य शस्त्रादिभेदानामुल्लेखं करोति कविः –**

यातैश्चातुर्विध्यमस्त्रादिभेदादव्यासङ्गैः सौष्ठवाल्लाघवाच्च।
शिक्षाशक्तिं प्राहरन्दर्शयन्तो मुक्तामुक्तैरायु-धैरायुधीयाः।। [9]

आयुधा अस्त्रापास्त्रव्यस्त्रमहास्त्रभेदाच्चतुर्विधाः सन्ति। धनुः 'अस्त्रम्' तस्य बहिःसंधानम् 'अपास्त्रम्' परिघादयो 'व्यस्त्रम्' आग्नेयवायव्यगारुडादयो "महास्त्रम्" इत्यभिधीयते।

स्वभुजद्वयकेवलायुधश्चतुरङ्गामपहाय वाहिनीम्।
बहुशः सह शक्रदन्तिना स चतुर्दन्तमगच्छदाहवम्।। [10]
द्वयोः हस्तिनोः चतुर्दन्ताख्ययुद्धविशेषस्यो-ल्लेखोऽस्ति।

अनेन सहैव युद्धविषयकनियमानामपि निदर्शनं करोति कविः –

मिश्रीभूते तत्र सैन्यद्वयेऽपि प्रायेणायं व्यक्तमासीद्विशेषः।
आत्मीयास्ते ये पराञ्चः पुरस्तादभ्यावर्ती संमुखो यः परोऽसौ।। [11]

तत्र युद्धे सैन्यद्वयेऽपि मिश्रीभूते मिलिते सति प्रायेणायं विशेषोऽसाधारणधर्मो व्यक्तमासीत्। पुरस्तादग्रे ये पराञ्चः पराङ्मुखाः परेऽपि ते आत्मीया अवध्याः। "न भीतं न परावृत्तम्" इति वधनिषेधश्रवणात्। यः पुरस्तादभ्यावर्ती परावर्ती सम्मुखोऽभिमुखः

स्वकीयोऽपि असौ परः शत्रुर्वध्य इत्यर्थः। प्राणलुब्धस्य स्वामिद्रोहित्वादित्यर्थः। पुनश्च –

प्राप्य भीममसौ जन्यं सौजन्यं दधदानते।
विध्यन्मुमोच न रिपूनरिपूगान्तकः शरैः।। [12]

अरिपूगानां शत्रुसङ्घानामन्तको अरिपूगान्तकोऽसौ कार्ष्णिः भीमं भयङ्करं जन्यं युद्धं प्राप्य आनते नम्रे सौजन्यं सौहार्दं दधत् न तु विध्यन्।" न क्लीबं न कृताञ्जलिम्" (मनु. 7/91) इति निषेधादिति भावः। रिपून्प्रतिपक्षान् शरैर्विध्यन्प्रहरन् न मुमोच। न ररक्षेत्यर्थः।

निपीड्य तरसा तेन मुक्ताः काममनास्थया।
उपाययुर्विलक्षत्वं विद्विषो न शिलीमुखाः।। [13]

तेन प्रद्युम्नेन तरसा बलेन कामं निपीड्य अनास्थयानादरेण मुक्ताः "आर्ता न परिहन्तव्याः" इति निषेधेनावध्या इति जीवन्तो मुक्ता इत्यर्थः। अन्यत्र क्षिप्ता विद्विषो विलक्षत्वं सत्रपत्वमाययुः। शिलीमुखा बाणास्तु विलक्षत्वं लक्षभ्रष्टत्वं नाययुः।
एवं महाकविना शिशुपालवधे युद्धशास्त्रविषयकज्ञानस्य सुन्दरं निदर्शनं कृतम्।

**सन्दर्भ**

1. शिशु.18.1
2. शिशु.18.2
3. शिशु.18.5
4. शिशु.18.6
5. शिशु.18.70
6. शिशु.20.13
7. शिशु.16.67
8. शिशु.19.41
9. शिशु.18.11
10. शिशु.16.69
11. शिशु.18.18
12. शिशु.19.13
13. शिशु.19.18